Sanchar Sutra | ISSN NO.- 2584-1769

# शारीरकचतुःसूत्रीविचारे बेल्लङ्कोण्डरामरायकविना प्रतिपादितस्य आत्मस्वरूपस्य विश्लेषणम्

**श्रद्धा उपाध्ये टोकेकर**
सहायकप्राध्यापिका
संस्कृतविभागः
इन्द्रप्रस्थमहिलामहाविद्यालयः, दिल्ली

## शोधपत्रस्य सारांशः (Abstract)

## भूमिका –

विगतशतके लब्धजन्मा, शताधिकग्रन्थकर्ता, अपरशङ्करेति बिरूदान्वितः बेल्लङ्कोण्डरामरायकविः शारीरकचतुः

सूत्रीविचारनामकम् अभिनवं कञ्चन प्रकरणग्रन्थं रचितवान् । तत्र चतुःसूत्रीव्याख्यानसन्दर्भे सः आदिमस्य

`**अथातो ब्रह्मजिज्ञासा**` इति सूत्रस्य व्याख्यायां हेतुवाचकस्य अतःशब्दस्य शताधिकार्थान् प्रदर्श्य

`**कस्मात् हेतोः**`

मुमुक्षुणा ब्रह्मविचारः एव कर्तव्यः इति सयुक्तिकं प्रतिपादितं वर्तते ।

## विषयोपस्थापनम्

तत्रैव चतुःसूत्रीवर्णनक्रमे आत्मस्वरूपस्यापि चर्चा ग्रन्थे बहुषः विकीरितरूपेण प्राप्यते । सः सर्वोपि विषयः क्रमशः

संगृह्य अत्र विलिख्यते । येन ब्रह्मसूत्रचतुःसूत्रीदृष्ट्या ग्रन्थकारोक्तदिशा च अस्य विषयस्य समग्रम् अवलोकनं विश्लेषणं च कर्तुं शक्येत ।

साधनचतुष्टयसम्पन्नेन मुमुक्षुणा ब्रह्मज्ञानार्थं वेदान्तविचारः कर्तव्यः इति `**अथातो ब्रह्मजिज्ञासे**` ति आद्यसूत्रस्य अर्थः बोद्धव्यः। **आत्मा वारे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्य** इति श्रुतिर्मानम्।

**वेदान्तविचारस्य ब्रह्मज्ञानं फलम्। ब्रह्मज्ञानस्य च ब्रह्मप्राप्तिः फलम्। ब्रह्मप्राप्तिश्च ब्रह्मभाव एव। तद् वेदितुः स्वरूपम् अर्थात् तत् जीवस्वरूपम् - आत्मनः एव ब्रह्मत्वात्** इति ग्रन्थे प्रतिपादितम् । एवं प्रकारेण सूत्रव्याख्यानमाध्यमेन ग्रन्थकारेण **`आत्मस्वरूपम्`** उपवर्णितं वर्तते ।

## लेखोद्देश्याः –

१. बेल्लङ्कोण्डरामरायकवेः योगदानस्य प्रतिपादनम् ।

२. चतुःसूत्रीविश्लेषणम्

३. अतःशब्दविचारे `आत्मस्वरूपवर्णनस्य औचित्यम् ।

४. शारीरकचतुःसूत्रीविचारस्य अपूर्वत्वम्

५. आधुनिककाले शारीरकचतुःसूत्रीविचारग्रन्थस्य छात्रदृष्ट्या उपादेयतायाः अनिवार्यतायाः च प्रतिपादनम् ।

## शोधपद्धतिः –

मुख्यत्वेन विश्लेषणात्मकपद्धतिः अवलम्ब्यते । क्वचित् समीक्षणात्मकं क्वचित् च तुलनात्मकपद्धतिरपि आश्रिता भवेत् ।

## शोधपरिणामः -

१. आत्मवर्णनक्रमे चतुःसूत्रीदिशा प्राप्तम् आत्मस्वरूपम् ।

२. चर्चायां ग्रन्थकारेण मण्डिताः अद्वैतसिद्धान्ताः ।

३. आत्मनानात्वादिमतानां खण्डनम् ।

४. अद्वैतवेदान्तप्रमेयज्ञानम्

५. सूत्रविश्लेष्णस्य अभिनवोदाहरणम्

६. भविष्यदृष्ट्या शोधशक्यतानां प्रतिपादनम् ।

**प्रमुखशब्दावली - ब्रह्मविचारः, चतुःसूत्री, आत्मपरिच्छेदः, द्वैतपदार्थः, भ्रान्तिः**

# शारीरकचतुःसूत्रीविचारे श्रीबेल्लङ्कोण्डरामरायकविना प्रतिपादितस्य आत्मस्वरूपस्य विश्लेषणम् ।

श्रीशङ्कराचार्याणां अद्वैतसिद्धान्तस्य आकर्षणकारणेन अन्यसम्प्रदायानाम् अनुष्ठातारः आचार्या अपि स्वमतदार्ढ्यै शाङ्करभाष्यस्य पठनावसरे मोहिताः भूत्वा बहूनाम् अद्वैतप्रकरणानां रचनां कृतवन्तः ।

वैष्णवसम्प्रदाये विगतशतके लब्धजन्मानः हयग्रीवसमुपासकाः शताधिकग्रन्थकर्तृत्वशालिनः बेल्लङ्कोण्डरामरायकवयः अपि अद्वैतमतस्थापनपुरस्सरान् विविधग्रन्थान् अरचयन् । **शारीरकचतुःसूत्रीविचारः** तेषु एव अन्यतमः विलक्षणश्च कश्चन प्रकरणग्रन्थः । अस्य ग्रन्थस्य विषयस्तावत् नाम्नैव ज्ञायते ।

प्रथमसूत्रस्य प्रतिपदव्याख्यानम् एतैः स्वपाण्डित्येन अभिनवपद्धत्या कृतं वर्तते । **अथातो ब्रह्मजिज्ञासेति** त्रिपदात्मकस्य आद्यसूत्रस्य व्याख्यानावसरे अथशब्दः आनन्तर्यसूचको वर्तत इति व्याख्याय, **अतःशब्दस्य हेतुवाचकत्वात्**[1]**, ब्रह्मजिज्ञासायै शताधिकहेतवः भवितुम् अर्हन्ति इति यत् तैः दर्शितं तत् पूर्वाचार्याणाम् अपेक्षया अत्यन्तम् अभिनवम् ।** एतादृशव्याख्यानावसरे तत्र तत्र बहूनां अद्वैतशास्त्रगतप्रमेयानां, तत्त्वानां च उल्लेखः तैः कृतः । तत्पठनेन तेषां विषयप्रतिपादनवैलक्षण्यं, शास्त्रबोधनकौशलं च सकृदेव ज्ञायते ।

शारीरकचतुःसूत्रीविचारे चतुःसूत्रीवर्णनक्रमे आत्मस्वरूपस्यापि वर्णनं ग्रन्थे वर्तते । ग्रन्थगतविषयबाहुल्यात् तत्तत् सन्दर्भानुसारं, विविधस्थानेषु अनुस्यूतरूपेण यत् आत्मतत्त्वप्रतिपादनं कृतं तत् बहुषः विकीरितरूपेण दृश्यते । सः सर्वोपि विषयः क्रमशः संगृह्य अत्र विलिख्यते । येन ब्रह्मसूत्रचतुःसूत्रीदृष्ट्या ग्रन्थकारोक्तदिशा च आत्मस्वरूपस्य समग्रम् अवलोकनं विश्लेषणं च कृत्वा अद्वैतसिद्धान्ताधारितं तस्य अन्तिमं स्वरूपं यथावत् प्राप्तुं शक्येत ।

[1] ब्र. सू.१. शां. भा. चौखम्बा प्रकाशनम्

ब्रह्मसूत्रस्य सर्वास्वपि पूर्वतनव्याख्याग्रन्थेषु कुत्रापि चतुःसूत्र्याम् एतादृशं विस्तृतं च वर्णनं प्राप्तुं न शक्यते इति श्रीबेल्लङ्कोण्डरामरायकविना विरचितस्य `शारीरकचतुःसूत्रीविचारस्य` वैलक्षण्यं वर्तते ।

## शारीरकचतुःसूत्रीविचारानुसारम् आत्मस्वरूपम्

साधनचतुष्टयसम्पन्नेन शास्त्राधिकारिणा ब्रह्मज्ञानार्थं वेदान्तविचारः कर्त्तव्यः इति `अथातो ब्रह्मजिज्ञासे`ति आद्यसूत्रस्य अर्थः बोद्धव्यः । तत्र **आत्मा वारे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्य**[2] इति श्रुतिर्मानम् । **वेदान्तविचारस्य ब्रह्मज्ञानं फलम् । ब्रह्मज्ञानस्य च ब्रह्मप्राप्तिः फलम् । ब्रह्मप्राप्तिश्च ब्रह्मभाव एव । तद् वेदितुः स्वरूपम् अर्थात् तत् जीवस्वरूपम् - आत्मनः एव ब्रह्मत्वात्** इति ग्रन्थे प्रतिपादितम् ।[3]

शारीरकचतुःसूत्रीविचारनामके ग्रन्थे चतुःसूत्र्याः वर्णनसमये आदौ **प्रथमसूत्रस्य अथातो ब्रह्मजिज्ञासा** इत्यस्य स्पष्टीकरणं कृतं वर्तते । तत्रैव आदौ अनुबन्धचतुष्टयस्य वर्णनान्तरम् **अथ**शब्दस्य वर्णनपुरस्सरम् अतःशब्दस्य वर्णनार्थं कविः प्रयतते । तदा मुमुक्षुणा ब्रह्मज्ञानार्थं वेदान्तविचारः कर्तव्यः इति सिद्धान्तपर्यन्तं सः प्रथमसूत्रस्य अर्थम् अन्वेति ।

अग्रे च ब्रह्मज्ञानं , ब्रह्मस्वरूपं च प्रतिपाद्य **`आत्मा च ब्रह्म`**[4] इति प्रतिपादितम् अनेन विदुषा । ततश्च **आत्मानात्मनोर्विवेकः, ब्रह्मप्राप्तिश्च अस्य शास्त्रस्य प्रयोजनम्**[5] इत्यपि उक्त्वा **ब्रह्मप्राप्तिरेव मोक्षः**[6] इति वचनैः ब्रह्मप्राप्तेः परमपुरुषार्थत्वमपि दर्शितम् । तत्प्राप्त्यर्थम् उपासनं कर्तव्यम् इति रामानुजमतस्य खण्डनं कृत्वा आत्मानात्मनोरितरेतराध्यासं नाशयित्वा बद्धस्य आत्मनो मोक्षार्थं ब्रह्मजिज्ञासा कर्तव्या इति प्रथमसूत्रस्य अंशिकं वर्णनं कविना कृतं वर्तते ।

तत्रैव अयं संसारः आत्मानात्मनोः अध्यासपूर्वकः अस्ति इत्यपि प्रतिपादनं वर्तते । अनेन ग्रन्थकारेण अतःशब्दस्य प्रथमहेतुत्वेन **संसारस्य अध्यासपूर्वकत्वात्**[7] इति वचनैः ब्रह्मजिज्ञासायाः प्रथमः हेतुः दर्शित वर्तते ।

अत्र आत्मानात्मनोरध्यासस्य आदौ चर्चां कृत्वा अध्यासः कः? तस्य लक्षणानि कानि? तस्य स्वरूपं किम् ? इति विचारितं वर्तते । ततश्च आत्मा अनात्मा इति उभयोः तत्त्वयोः ज्ञानार्थं आत्मस्वरूपबोधाय

---

[2] च. ब्रा. बृह.उप. गीताप्रेस गोरखपुर
[3] के. वे.शा. पृ. २, शा.चतु.वि.
[4] तत्रैव
[5] तत्रैव
[6] तत्रैव
[7] के. वे.शा. पृ. ५३, शा.चतु.वि.

आत्मस्वरूपम् अपि अनेनैव व्याजेन अस्मिन् ग्रन्थे आगतम् अस्ति । तत्र जाग्रत्पदार्थस्य अध्यस्तत्वम् अस्ति वा न वा ? इति चर्चायाः अनन्तरम् आत्मनः वर्णनं प्राप्यते ।

आत्मनः स्वरूपनिर्धारणार्थम् आदौ आत्मपरिच्छेदस्य सयुक्तिकं खण्डनं कृत्वा ग्रन्थकारेण आत्मब्रह्मणोरभेदः प्रतिपादितः।

## १. आत्मब्रह्मणोः अभेदः -

पूर्वपक्षस्य आशङ्कासमाधानरूपेण ग्रन्थे विषयोपस्थापनम् अद्वैतवेदान्तदृष्ट्या तत्त्वविमर्शश्च कार्यते । तस्मात् आत्मब्रह्मणोः भेदः अस्ति उत न इत्यस्य उत्तरम् **आत्मपरिच्छेदकवस्तु-अभावेन आत्मपरिच्छेदाभावात्** इति हेतुं प्रदाय ग्रन्थकारः स्पष्टीकरोति यत् आत्मब्रह्मणोः मध्ये नास्ति कोऽपि भेदः इति । आत्मना परिच्छिन्नः जीवः यद्यपि अध्यासकारणेन तद्भिन्नतया भासते तथापि ब्रह्मात्मनोः परिच्छेदकत्वं दर्शयितुं वस्तुविशेषस्य अभावात् आत्मपरिच्छेदाभाव एव सर्वैः ज्ञायते । तस्मात् तयोः भिन्नत्वं नास्ति इत्यतः **आत्मब्रह्मणोः अभेदः** सिद्ध्यति । **आत्मपरिच्छेदस्य खण्डनमपि** अनया चर्चया जातम् ।

### २. आत्मनः अपरिच्छिन्नत्वम् -

अतः आत्मा अपि ब्रह्मतत्त्ववत् पारमार्थिकं तत्त्वम् इति ज्ञायते । तर्हि पारमार्थिकस्य आत्मनः घटादिभिः परिच्छेदः भवितुं शक्यते वा इत्यस्य पूर्वपक्षस्य उत्तरप्रसङ्गे मरीच्युदकेन मरुभूमेः पङ्कीलत्वस्य उदाहरणम् उक्त्वा ग्रन्थकारः कथयति यत् - यथा प्रातिभासिकेन मरीच्युदकेन मरुभूमेः पङ्कीलत्वं साधयितुं न शक्यते तथा व्यावहारिकघटादिमाध्यमेन पारमार्थिकस्य आत्मनः परिच्छेदः न शक्यते दर्शयितुम् । **व्यावहारिकवस्तुना पारमार्थिकपरिच्छेदाभावात्** आत्मब्रह्मणोः परिच्छेदः न शक्यते ।

### ३. आत्मनानात्वखण्डनम् -

जीवनानात्वकारणेन आत्मनानात्वमङ्गीकृतवतां मतेन एकस्य आत्मनः परिच्छेदः आत्मान्तरेणापि कर्तुं शक्येत इति प्रश्नस्य उत्तरसमये ग्रन्थकारः स्पष्टीकरोति यत् एकस्य आत्मनः परिच्छेद अपरेण आत्मनापि कर्तुं न शक्यते **आत्मनः एकत्वात् भेदाभावाच्च** । तदर्थम् - `**एको देव सर्वभूतेषु गूढः ।**`[8] इति श्रुतिवाक्यं प्रमाणत्वेन ददाति । अत एव एकेन आत्मना अपरस्य आत्मनः परिच्छेदः कर्तुं न शक्यते । **अविद्यावच्छिन्नोपि जीवः पुनरन्तःकरणेनावच्छिद्यते - अत एव जीवनानात्वप्रतीतिः**[9] इति वाक्येन ग्रन्थकारः जीवनानात्वानुभूतेः कारणं प्रतिपादयति । अविद्यायाः अवच्छेदकारणेन जीवः

---

[8] श्वेता. ६.११गीताप्रेस गोरखपुर

[9] पृ. सं ७

अन्तःकरणावच्छिनः भवति । आत्मनः अविद्यान्तःकरणावच्छेदेन जीवनानात्वप्रतीतिः भवति, न तु वस्तुतः । अतः आत्मा एक एव इति सिद्ध्यति ।

अभ्युपगमसिद्धान्तदृष्ट्या आत्मभेदसत्त्वम् अङ्गीकर्तुं शक्यते । तथापि आत्मनः परिच्छिन्नत्वम् स्वीकृतं चेत् आत्मभेदस्यापि अङ्गीकारः कर्तव्य स्यात् । तेन च आत्मपरिच्छेदस्य अपि सिद्धिः भवेत् । एवम् अन्योन्याश्रयदोषः आपतेत् इति कारणेन अपि अभ्युपगमदृष्ट्यापि आत्मपरिच्छेदः भवितुं नार्हति । अतः अद्वैतवेदान्तानुसारम् आत्मा अपरिच्छिन्नः एव भवति इति सिद्धम् ।

ब्रह्मणा आत्मनः परिच्छेदः भवितुं शक्यते वा इत्याशङ्कायां ग्रन्थकारः कथयति यत् ब्रह्मात्मभेदस्य अनङ्गीकारः केनापि शास्त्रेण न क्रियते इति कारणेन **द्वैतशास्त्रदृष्ट्यापि ब्रह्मात्मभेदस्य अङ्गीकारात्**, **असिद्धत्वात्** च ब्रह्मणा आत्मपरिच्छेदः न शक्यते कर्तुम् ।

**४. आत्मा सप्रमाणः** -

अग्रे इतोऽपि आत्मपरिच्छेदविषये उच्यते यत्, यदि आत्मा न परिच्छिद्यते तर्हि सः अप्रमाणः इत्यपि न वक्तव्यम् । यत्र यत्र परिच्छिन्नत्वं तत्र तत्र अप्रमाणत्वम् इति वक्तुं कदापि न शक्यते । यतो हि अद्वैतवेदान्तदृष्टया श्रुतिवचनं बलिष्ठं प्रमाणम् अतः आत्मनः अपरिच्छेदत्वेपि तस्य अप्रमाणत्वं न भवति इति बोधयितुं `**एकोदेवसर्वभूतेषु गूढः ।` नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः**[10] इति स्मृतिवाक्यं च प्रमाणत्वेन उद्धरति ग्रन्थकारः ।

**५. आत्मनः अणुत्वस्य खण्डनम्** -

अयम् आत्मा निरवयवः ततश्च अपरिच्छिन्नोऽपि अतः आत्मा अणुरेवस्यात् इत्यपि न वाच्यम् । यतोऽहि अणोः सर्वगतत्वं भवति परन्तु तत्र चलत्वं न भवति । अणोः सर्वगतत्वम् अचलत्वं च असम्भवम् । यत् अणु तत् सर्वगतम् अपि भवितुं नार्हति अचलम् अपि भवितुं नार्हति । यत् विभूः तदैव सर्वगतं तदैव चलं भवतीत्यतः **आत्मा विभूः** इत्यैव अद्वैतिनां मतम् । अत एव अणो सर्वगतत्वम्, अचलत्वं, असम्भवात् इति हेतुं प्रदर्श्य ग्रन्थकारः आत्मनः अणुत्वस्य खण्डणं करोति । सर्वगतत्वस्य गुणः विभुपदार्थे एव सम्भवति । अवकाशाभावात् विभुवस्तु न क्वापि चलति इत्यपि वक्तुं न शक्यते । यतो हि **यत् विभुः तत् चलम्** इत्यपि सिद्धान्ततया स्वीकरणीयं भवति ।

यदि आत्मनः अणुत्वस्य खण्डनं क्रियेत तर्हि मशकादिसूक्ष्मदेहेषु तस्य अस्तित्वं कथं शक्यते साधयितुम् इति केनाऽपि न वक्तव्यम् । यतो हि **आत्मा विभूः स च सर्वव्यापि गगनवत्** । ततः तस्य

---

[10] गीता २अ.२४ श्लोक, गीताप्रेस गोरखपुर

प्राप्तिः सर्वत्रैव भवति इति कारणेन मशकादिसूक्ष्मदेहेषु आत्मनः अणुत्वस्य अनणुत्वस्य परिमाणस्य वा न कोऽपि सम्बन्धः ।

**६. आत्मनः शरीरोत्क्रान्तिः -**

अग्रे गत्वा इतोऽपि आचार्यः आत्मनः शरीरात् उत्क्रान्तिविषये स्वमतम् उपस्थापयति **"जीवापेतम् वाव किल शरीरं म्रियते ।"**[11] इति श्रुतिवचनप्रमाणं प्रदर्श्य सः प्रतिपादयति यत् आत्मनः जीवोत्क्रमणं बुद्धितादात्म्याध्यासस्य कारणेन भवति **ध्यायतीव लेलायतीव**[12] इति श्रुतिरपि तदैव समर्पयति । बुद्धेः आत्मनश्च अविवेकादेव बुद्धिधर्मान् परिच्छिन्नकर्तृत्वभोक्तृत्वादिन् सर्वानपि आत्मानि अध्यस्य सः आत्मा कर्ता, भोक्ता इति व्यवहारः लोके सर्वत्र भवति । बुद्धेः कर्तृत्वादयः गुणाः साक्षिणि आत्मणि भ्रान्त्यारोप्यन्ते इति स्पष्टीकर्तुम् **अध्यात्मरामायणस्य** श्लोकः अपि अत्र उद्धृतः अस्ति -

**साभासबुद्धेः कर्तृत्वमविच्छिन्नेऽविकारिणि ।**
**साक्षिण्यारोप्यन्ते भ्रान्त्या जीवत्वं च तथाऽबुधैः ॥**

## ७. आत्मनः पूर्णब्रह्मणा एकत्वम् -

**जीवो नाम बुद्ध्यवच्छिन्नः आत्मा ।** तस्य बुद्ध्यावच्छिन्नस्य आत्मनः पूर्णब्रह्मणा एकत्वं कथं शक्येत इति प्रश्ने सति अत्र अवगन्तव्यं भवति यत् बुद्धिः आत्मना अध्यस्ता भवति । तेन च बुद्ध्यवच्छिन्नस्य आत्मनः अपि अध्यस्तत्वं भवति । वस्तुतस्तु आत्मा पूर्णब्रह्मैव । अध्यासकारणेन बुद्धिगुणाः बुद्धेः वा आत्मनि आरोपणं क्रियते । अत एव धर्मध्याससन्दर्भे अयं सर्वोऽपि विचारः ग्राह्यः ।

एवं प्रकारेण वयं अपरिच्छिन्नस्य आत्मनः पूर्णत्वात्, पूर्णेन ब्रह्मणा सह एकत्वं प्रतिपादयितुं शक्नुमः । तत्वमस्यादि वाक्येऽपि तदेव प्रतिपादयते । यत् पूर्णचैतन्यं, पूर्णब्रह्म इत्यादिशब्दैः वाच्यते तेन् बुद्ध्यवच्छिन्नचैतन्यस्य न कोऽपि भेदः। व्यवहारदृष्ट्या उभयत्रापि भेदः दृश्यते चेदपि तत्र विद्यमानं तत्त्वम् एकमेव । अर्थात् पूर्णब्रह्मणः बुद्ध्यवच्छिन्नचैतन्यस्य च न कोऽपि भेदः इति अत्र सिद्धान्तः ।

## ८. आत्मनः सर्वान्तरत्वम् -

आत्मनि विद्यमानं सर्वान्तरत्वम् एव प्रत्यक्त्वम्, तदेव च चैतन्यस्य स्वरूपम् । सर्वान्तरं ब्रह्म भवति उत प्रत्यगात्मा इति न वाच्यम् । **यदयमात्मा सर्वान्तरः**[13] इति श्रुतिः आत्मनः सर्वान्तरत्वं दर्शयति ।

---

[11] छा. उ. ६ । ११ । ३, गीताप्रेस गोरखपुर
[12] शत. ब्रा. १४.७.१गीताप्रेस गोरखपुर
[13] बृह. उ. 3.4.1

अन्तर्यामिब्राह्मणः सन्दर्भे यस्य आत्मनः वर्णनम् अन्तर्यामित्वेन कृतं वर्तते तस्याऽपि अन्तर्यामी कोपि परमात्मा स्यात् इति कथनम् अनुचितम् । एवं प्रकारेण आत्मब्रह्मणोः तारतम्यं न कल्पनीयम् । यतोऽहि अन्तर्यामिब्राह्मणे प्रयुक्तः आत्मशब्दः बुद्ध्यादिवाचकः वर्तते । न तु सः आत्मवाची । निरवयवस्य अतिसूक्ष्मस्य प्रत्यगात्मनः अन्तः तदतिरिक्तस्य परमात्मादिकस्य कल्पना व्यर्था एव । तत्र कस्यापि अन्यस्य अभावात् आत्मनि तन्न शक्यते ।

## ९. ईश्वरात्मनोरभेदः -

**ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठति** इति वाक्यगतस्य ईश्वरशब्दस्य परमात्माचैतन्यम् इत्यैव अर्थः ग्राह्यः भवति । ततः प्रत्यगात्मा इति शब्दस्य अर्थः भागवतवाक्यतः सप्रमाणं दर्शयति ग्रन्थकारः । **"प्रत्यग्रूपं स्वयंज्योतिः विश्वं येन समन्वितम्"** अर्थात् प्रत्यगात्मा स्वयंप्रकाशी अस्ति । तेनैव जगत्सर्वं प्रकाश्यते इति कारणेन ब्रह्मैव प्रत्यगात्मा । स एव परमात्मा । तदैव चैतन्यम् इत्यादि शब्दैः प्रयुज्यते वर्ण्यते च लोके ।

आत्मपरमात्मनोः लक्षणम् अपि अत्र ग्रन्थे प्राप्यते । अन्तःकरणावच्छिन्नं चैतन्यं प्रत्यगात्मा मायावदवच्छिन्नं चैतन्यं च परमात्मा इति । यदि माया एका भवति तर्हि तया अवच्छिन्नं परमात्मरूपं चैतन्यं एकमेव स्यात् इति नैव चिन्तनीयम् । यस्मात् अन्तःकरणं नानाविधं तस्मात् तेन च अवच्छिन्नः प्रत्यगात्मा अपि नानाविधः इति वक्तुम् अवसरो अस्ति । परन्तु तत्रापि माया विभू आत्मा च परिच्छिन्नः इति कारणेन आत्ममाययोः भेदकारणेन च प्रत्यगात्मा परमात्मनोः अपि भेदः स्यात् इति न वक्तव्यम् । यतो हि मायावदवच्छिन्नत्वम् अन्तःकरणावच्छिन्नत्वम् चेति उभयमपि उपाधी भेदत्वेन गृह्येते । उपाधिभेदे सत्यपि न तात्त्विक भेदो न वा वस्तुभेदः ग्राह्यो भवति । अतः मायाच्छिन्नत्वम् अन्तःकरणावच्छिन्नत्वं च इति विभागद्वारा आत्ममाययोः भेददर्शनेन च आत्मपरमात्मनोः भेदः न शक्यते वक्तुम् । उपाधिभेदे सत्यपि वस्तुभेद न शक्यते अङ्गीकर्तुम् । अत एव अन्तःकरणनानात्वे अङ्गीकृतेऽपि आत्मनानात्वं अङ्गीकर्तुं न शक्यते । घटनानात्वेऽपि गगननानात्वं न भवति तद्वत् ।

## १०. जीवनानात्वेपि चैतन्याभेदः -

जीवनानात्वसन्दर्भे आत्मैकत्वं कथं घटते ? इति प्रश्नस्य उत्तरार्थं ग्रन्थकारः वदति यत्, एकमेव चैतन्यं मायोपहितं सत् **ब्रह्म** इति उच्यते । तदैव यदा अन्तःकरणोपहितं भवति तदा **प्रत्यगात्मा** इति शब्देन कथ्यते । अतः चैतन्यभेदः नास्ति इति सिद्धान्तः । एवं प्रकारेण चैतन्याभेदं दर्शयितुम् एव **"तत्त्वमसि"** वाक्यस्य प्रसङ्गो वर्ण्यते । तत्त्वमसि इत्यत्रापि शुद्धचैतन्ये लक्षणा अभ्युपगता भवति ।

## ११. तत्त्वमसि वाक्यार्थः  विशिष्टाद्वैतखण्डनं च -

जीवब्रह्मणोः अभेददर्शनार्थं एव **तत्त्वमसि** इति महावाक्यस्य प्रमाणत्वेन उल्लेखः क्रियते । तत्रापि शुद्धचैतन्ये लक्षणा अभ्युपगम्यते । तत्त्वमसि महावाक्ये तत्पदेन ब्रह्मणः ग्रहणं भवति । तत् ब्रह्म परोक्षत्वादि-सर्वज्ञत्वादि-लक्षणः मायोपाधिकः भवति । जगतः योनिः अर्थात् कारणं भवति  इत्यतः ब्रह्म **तत्** -पदवाच्यं भवति । तदेव ब्रह्म यदा अन्तःकरणावच्छिन्नं सत् अस्मत्प्रत्ययालम्बनं भवति तदा **त्वम्प**दवाच्यं भवति । तत्र परा उपाधिः माया जीवोपाधिः च

अविद्या इत्यनयोः उभयोरपि अर्थात मायाविद्ये विहाय तत्-त्वम्-पदयोः यत् लक्ष्यार्थगतम् अतः मायाविद्ये विहाय प्रत्यगात्मभिन्नं ब्रह्म एव तत्-त्वंपदयोः लक्ष्यं भवेत् इति पैङ्गलोपनिषदः वाक्यं प्रमाणम् । तस्मात् तत्त्वमसिवाक्ये शुद्धचैतन्ये लक्षणा अभ्युपगम्यते । शुद्धचैतन्ये लक्षणा इति उक्तम् इति कारणेन तत्त्वमस्यादिवाक्येषु आत्मपरयोः शुद्धाद्वैतं प्रतिपाद्यते इति स्पष्टं भवति । तत्त्वमस्यादिना शुद्धाद्वैतं प्रतिपाद्यते न तु विशिष्टाद्वैतम् ।

विशिष्टाद्वैतसिद्धान्ते शरीरस्य अर्थात् जीवस्य शरीरिणा सह अर्थात् आत्मना सह विशिष्टाद्वैतम् उच्यते । अर्थात् जीवस्य ब्रह्मणा सह विशिष्टम् अद्वैतं प्रतिपाद्यते । परन्तु शुद्धचैतन्ये लक्षणा भवति इति प्रतिपादनेन विशिष्टम् अद्वैतम् अत्र स्वयमेव खण्डितं भवति तस्मात् रामानुजवादो निर्मुलितः इति स्फुटतया ग्रन्थकारः लिखति ।

लक्षणायाः प्रकारेषु तत्त्वमसि इत्यादि स्थलेषु जहदजहल्लक्षणा भवति इति बोधव्यम् । तत् स्पष्टयितुं तत्कालवाचिनः देवदत्तस्य एतत् कालवाचिनः देवदत्तस्य च अभिन्नत्वदर्शकेन उदाहरणेन चैतन्याभिन्नत्वं दर्शयति ग्रन्थकारः । यथा तत्र देवदत्तस्य प्रसङ्गे एकस्यैव देवदत्तस्य अस्तित्वं भवति तथैव तत्त्वमसिप्रसङ्गे एकमेव  चैतन्यम् उपदिश्यते । तत्र माया-अविद्ये स्वगतोपाधिभेदेन आत्मपरमात्मनोः भेदं दर्शयतः । तस्मात् वस्तुतः तत्र अभेदः एव इति भावः ।

तत्त्वमसि इत्यादिस्थले असत्त्वस्य उपाधेः परित्यागः कथं लक्षणया कर्तुं शक्यते ? इत्यस्य पूर्वपक्षस्य उत्तरकाले सिद्धान्तपक्षस्य प्रतिपादनावसरे विशुद्धे निर्विशेषचैतन्ये आत्मनि मायाविद्ये अध्यस्ते भवतः इति प्रतिपादितम् । अध्यस्तस्य सर्वस्यापि वस्तुनः मिथ्यात्वम् रज्जूसर्पयोरिव स्फुटं ज्ञायते इत्यपि स्पष्टीकृतम् । अत्रैव अग्रे जगन्मिथ्यात्वस्य सिद्धान्तप्रतिपादनार्थं मिथ्यात्वस्य अध्यासस्य च चर्चा कृता वर्तते ।

एवं प्रकारेण आत्मपरमात्मनोः अभेददर्शनसमये तत्वमसिमहावाक्यस्य विचारोऽपि दर्शितः ग्रन्थकारेण ।

## १२. बुद्धेः साभसत्वम्, आत्मनः मिथ्यात्वस्य च खण्डनम् -

कथंकारं तर्हि बुद्धिः एवंविधतया अध्यस्ता भवितुमर्हति इति चर्चा समयेपि आत्मनः उल्लेखः प्राप्यते । तत्र उत्तरति ग्रन्थकारः यत् अतिस्वच्छस्वरूपत्वात् बुद्धिः आत्मनः प्रतिफलनं गृह्णाति । अतः एव तस्याः साभासत्वं भवति ।

आभासो नाम प्रतिफलनम् । यद्यपि बुद्धिः प्रतिफलनं गृह्णाति तथापि यस्मात् सा प्रतिफलिता भवति तस्य आत्मनः प्रतिबिम्बं न शक्यते भवितुम् । आत्मा स्वयं निरूपः भवति । यथा निरूपस्य गगनस्य जलादौ प्रतिफलनं न दृश्यते तथा निरूपस्य आत्मनः प्रतिफलनं बुद्धौ न शक्यते इति तर्कः केनचित् दीयते चेत् ग्रन्थकारः श्रुतिमुल्लिखति **रूपं रूपं प्रतिरूपो बभूव** इति श्रुत्याधारेण बुद्धेः प्रतिफलनं सप्रमाणमस्ति । **आभास एव च, अत एव चोपमा सूर्यकादिवत्** इति सूत्रमाध्यमेनापि तस्य प्रामाण्यं दर्शयितुं शक्यते ।

## वैशिष्ट्यम् -

**आभासस्य मिथ्यात्वेऽपि तेन माध्यमेन अनुस्युतस्य आत्मचैतन्यस्य मिथ्यात्वं ग्रहीतुम् न शक्यते ।**

## १३. बिम्बप्रतिबिम्बग्रहणम् -

परमात्मा बिम्बरूपः भवति । तस्य प्रतिबिम्बत्वेन अथवा आभासत्वेन प्रत्यगात्मा ग्राह्यः इति । अद्वैतवेदान्तदृष्या तु उभयथाऽपि न दोषाय । अत्र बिम्बप्रतिबिम्बरूपेण चैतन्यमेव विवक्षितमिति कारणेन प्रतिबिम्बबिम्बयोश्च चैतन्यत्वात् प्रत्यगात्मनः अर्थात् परमात्मनः एव विवक्षितत्वात् जीवब्रह्माभेदसिद्धिः भवति अतः योग्यमेव न कापि हानिः इत्यर्थः ।

## १४. प्रत्यगात्मना ब्रह्मणः अभेदः -

श्रुतिशतैः जीवात्मनोः अभेद एव प्रदर्श्यते । त्रिविधभेदरहितत्वात् जीवब्रह्मणोः ऐक्यमेव वाच्यं भवति इत्यत्र ग्रन्थे स्पष्टीकृतं वर्तते । तदर्थं ब्रह्म कथं स्वगतादिभेदरहितं भवतीति सप्रामाणं ग्रन्थे वर्णितम् । तद्विस्तारभयात् अत्र ने दीयते ।

यदि केनापि प्रकारेण ब्रह्मणि भेदः दर्शयितुं न शक्यते तर्हि तत्र अभेद एव वक्तव्यः भवेत् । ब्रह्मणः एकत्वात् प्रत्यगात्मना ब्रह्मणः अभेद एव बोद्धव्यः ।

## १५. ब्रह्मणः एव जिज्ञासा कर्तव्या न तु प्रत्यगात्मनः -

प्रत्यगात्मब्रह्मणोर्मध्ये अभेदः अस्ति चेत् मुमुक्षुणा प्रत्यगात्मज्ञानमेव आप्तव्यम् । सः एव ज्ञातव्यः, न तु परमात्मा इति केचन वक्तुमर्हन्ति प्रत्यगभिन्न परमात्मनः अभावात् केवलस्य परमात्मनः अभ्युपगमनस्य व्यर्थत्वाच्च मुमुक्षुणा प्रत्यगात्मनः एव ज्ञानं आप्तव्यं मोक्षप्राप्त्यर्थम्।

तत्र अतःशब्देन स्वपक्षं प्रतिपादयति ग्रन्थकारः यत्, प्रत्यगात्मब्रह्मणोरभेदेऽपि प्रत्यगात्मतत्त्वं ब्रह्मतत्वं इति द्वे तत्त्वे स्तः । तत्र एकं अन्तःकरणावच्छिन्नं प्रत्यगात्मरूपेण ज्ञायते मायावच्छिन्नं च परमात्मरूपेण उच्यते

। एवम् उपाधिभेदकारणेन द्वयोरपि भेदः व्यावहारिकसत्तायां मन्तव्यः एव भवति । अतः तयोः द्वयोः एकमेव चैतन्यं मायावच्छिन्नं अन्तःकरणावच्छिन्नं च भूत्वा प्रत्यगात्मपरमात्मरूपेण व्यवह्रियते । परन्तु अन्तःकरणसृष्टेः प्राक् अन्तःकरणस्य एव अभावेन प्रत्यगात्मनः अभावात् । सृष्टेः प्राक् परमात्मनः एव सम्भवात् जगत्कारणभूतः परमात्मा अभ्युपगन्तव्यः भवति  भवति जगत्सिद्ध्यर्थं । अतः मुमुक्षुणा परमात्मनः अर्थात् ब्रह्मणः एव जिज्ञासा कर्तव्या न तु प्रत्यगात्मनः ज्ञानम् आप्तव्यम् इति सिद्धान्तः ।

**वैशिष्ट्यम् – ब्रह्मसूत्रदृष्ट्या अद्वैतवेदान्तदृष्ट्या च अत्यन्तमहत्त्वपूर्णोयं विषयः । किमर्थं ब्रह्मज्ञानमेव एव अद्वैतस्य प्रमेयम्, न तु आत्मज्ञानम्,  किमर्थं च ब्रह्मजिज्ञासा एव उपदिष्टा प्रथमसूत्रेण इति अनेन ज्ञायते ।**

## १६. आत्मधर्माणां व्यावहारिकत्वम् –

सुषुप्त्यादिपरमार्थदशायां चैतन्यस्य सर्वावभासनम् कथं शक्येत इति आशंकायाः समाधानार्थं सुषुप्त्यादिदशासु चैतन्यस्य सर्वावभासनत्वम् अङ्गीक्रीयते इति अद्वैतपक्षः उपस्थापितः । तत्रैव अग्रे यथा सुषुप्त्यादयः दशाः व्यावहारिकाः तथैव **सत्यत्वादयो आत्मधर्मा :** अपि व्यावहारिका एव मन्तव्याः इत्यपि प्रतिपादितम् ।

आत्मा नित्यः भवति चेदपि तस्मिन् विद्यमानाः **सत्यं ज्ञानमनन्तं ब्रह्म**[14] इत्यादिश्रुत्या कथ्यमानाः सत्यत्वादयो धर्माः व्यावहारिकाः भवन्ति इति प्रतिपादनेन अद्वैतसिद्धान्तः प्रदर्शितः ।

## १७. ब्रह्मविचारस्य अनिवार्यता -

ब्रह्म यद्यपि आत्मस्वरूपत्वेन शास्त्रप्रमाणकं भवति तथापि तत् नित्यं अपरोक्षमेव भवति इति ज्ञेयम् । आत्मनः ज्ञानं सर्वेषामस्ति चेदपि **ब्रह्मैव आत्मा** इति अर्थस्य बोधनाय एव शास्त्रस्य प्रामाण्यम् अपेक्षितं भवति । आत्मा सर्वेषां ज्ञायते चेदपि `नाहं ब्रह्म` इति भेदस्य सर्वविदित्वात् जीवब्रह्माभेदज्ञानं शास्त्रादेव भवति इत्यतः मुमुक्षुणा ब्रह्मजिज्ञासा कर्तव्या ब्रह्मविचारः कर्तव्य इत्यर्थ ।

## १८. साक्षिब्रह्मणोः अभेदविचारः -

जीवब्रह्माद्वैतविषये पूर्वपक्षिणः एवम् आशंकन्ते यद् अद्वैतं सिद्धं भवति उत साध्यम् इति । यदि सिद्धं तर्हि व्यर्थम् अद्वैतशास्त्रम् । यदि साध्यं तर्हि ब्रह्म अनित्यं भवेत् इति आक्षेपस्य समाधानावसरे आत्मचर्चायाः अंशः एव अत्र संङ्गृहितः विस्तारभयात् ।

[14] तैत्ति. उप. 2.1.1, गीताप्रेस गोरखपुर

आत्मब्रह्मणोः अभेदत्वात् यदा ब्रह्मशब्दस्य व्युत्पत्त्यर्थः चर्चितः तदैव आत्मशब्दस्यापि व्युत्पत्तिः ग्रन्थकारेण अत्र दर्शिता वर्तते । **अतति व्याप्नोति सर्वम् इति आत्मा** इत्यादि शब्दैः । यद् ब्रह्म स एव आत्मा स एव च साक्षी । तस्मात् साक्षिशब्दस्यापि व्युत्पत्तिं ग्रन्थकारः दर्शयति । **साक्षात् पश्यति इति साक्षी** इति वचनैः । अतः ब्रह्मणः साक्षित्वम् आत्मत्वं च अङ्गीकृते सत्यपि तस्मिन् बृहत्वादयो धर्माः भवन्ति इति नियमः । उभयत्रापि समानधर्माणां विद्यमानत्वात् साक्षिब्रह्मणोः अभेदः ज्ञेयः भवति । तर्हि इदानीं साक्षी-आत्मा-ब्रह्म-परमात्मा चेति सर्वेपि शब्दाः एकार्थनिदर्शकाः भवन्ति इति कारणेन एतेषु सुतराम ऐक्यं सिद्ध्यति ।

## १९. प्रमातुः ज्ञानाश्रयत्वम् –

परन्तु तथात्वेपि सर्वषां भेदेन व्यवहारः किमर्थं क्रियते इति शंका न करणीया । यतो हि सर्वोपि भेदव्यवहारः माया-अन्तकरणयोः उपाधिप्रयुक्तत्वात् भवति । मायोपाधिप्रयुक्तत्वात् ईश्वर इति भेदव्यवहारः भवति । अन्तःकरणोपाधिप्रयुक्तत्वात् च जीव इति शब्देन भेदव्यवहारः सिद्ध्यति । तस्मात् मायोपाधिः ईश्वरः । तस्य ज्ञानाश्रयत्वं न भवति इति कारणेन अहं ब्रह्मास्मि इति ज्ञानसन्दर्भे प्रमातुरेव ज्ञानाश्रयत्वं भवति न तु साक्षिणः । यतो हि साक्षित्वेन साक्षिणः एव ब्रह्मत्वात् तत् न शक्यते ।
तस्मात् प्रथमसूत्रे निर्दिष्टस्य अतःशब्दस्य इदमत्र तात्पर्यं भवति यत् प्रमातुरेव ज्ञानाश्रयत्वात् प्रमातृणा अर्थात् मुमुक्षुणा ब्रह्म जिज्ञासा कर्तव्या इति ।

## २०. बिम्बप्रतिबिम्बदृष्ट्या चैतन्यस्य एकत्वम् -

प्रतिबिम्बवशात् जीवनानात्वं सम्भवति । प्रतिबिम्बजीवस्य नानात्वे स्वीकृते बिम्बस्यापि नानात्वं भवतु इति न चिन्तनीयम् । यतो हि सूर्यस्य एकत्वेऽपि तद्गस्तप्रतिबिम्बनानात्वस्य दर्शनात् बिम्बनानात्वं न सम्भवति । यत् शुद्धचैतन्यं बिम्बगतं प्रतिबिम्ब गतं वा भवति तदेव ब्रह्म, तदेव साक्षी, तदेव प्रत्यगात्मा इति विविध शब्दैः अभिधीयते । तत्र प्रतिबिम्बगतं चैतन्यं प्रत्यगीति उच्यते । बिम्बगतं चैतन्यं च परमात्मा इति शब्देन व्यवह्रियते ।

## २२. नित्यानित्यवस्तुविवेकानन्तरं ब्रह्मविचारस्य अपेक्षा -

नित्यानित्यवस्तुविवेकसन्दर्भे किं नित्यं किं च अनित्यम् इति उपदेशसमये **ब्रह्म एकमेव नित्यं वस्तु**[15] इति अद्वैतिनः कथयन्ति । अन्यत् सर्वं च अनित्यम् इत्यपि तैः निर्णीतं वर्तते । एवंभूतस्य नित्यानित्यवस्तुविवेकस्य ज्ञानं ब्रह्मविचारं विनापि पुरुषस्य वेदान्तपाठात् आपाततः भवितुम् अर्हति एव

---

[15] वेदान्तसारः पृ.३. चौखम्बा प्रकाशन, वाराणसी.

। तस्मात् नित्यानित्यवस्तुविवेकार्थं ब्रह्मविचारस्य अपेक्षा नास्ति इति सिद्धान्तः अत्र ज्ञायते । नित्यानित्यवस्तुविवेकस्य हेतुः आपाततः वेदान्तपाठः । ब्रह्मविचारानन्तरमपि विवेकः जायते परन्तु तस्य स्वरूपः भिन्नं भवति । यतो हि ब्रह्मविचारानन्तरं जायमानः विवेकः अहम् आत्मा, आत्मा एक एव, ब्रह्म भिन्नत्वात्, अन्यत् सर्वं ब्रह्म मिथ्या एवं रूपः भवति । तस्मात् अत्र नित्यानित्यवस्तुविवेक -विचारयोः मध्ये अन्योन्याश्रय दोषस्य अवसरः नास्ति एव ।

## २३. वेदान्तविचारस्य आवश्यकता –

ब्रह्मज्ञानार्थं वेदान्तविचारः कर्तव्यः इति प्रथमसूत्रस्य अर्थः सर्वेषु ग्रन्थेषु प्राप्यते । परन्तु ब्रह्मज्ञानार्थं वेदान्तविचारस्य कल्पना पाणिस्थकङ्कणदर्शनार्थं दर्पणस्वीकारवत् व्यर्था भासते । यतो हि आत्मनः एव ब्रह्मत्वात्, ब्रह्मज्ञानार्थं वेदान्तविचारः कथं शक्यते कर्तुं इति पूर्वपक्षिणः आशङ्का ।

अत्र ग्रन्थकारः उपदिशति यत् **यत् साक्षात् अपरोक्षात् ब्रह्म**[16] इति श्रुतिवाक्यानुसारं ब्रह्मणः नित्यापरोक्षत्वेऽपि, तस्य आत्मनि विद्यमानत्वेऽपि, तस्यैव आत्मत्वे ऽपि विदुषामपि तत् दूरस्थमेव भवति । ब्रह्मज्ञानपर्यन्तं तु सर्वेषामपि तत् दूरे एव तिष्ठति । अर्थात् अनाप्तम् एव भवति । अत एव **आत्मा एव ब्रह्म** इति सिद्धान्तदृष्ट्या योग्यम् अस्ति चेदपि यावत्पर्यन्तं ब्रह्मणः ज्ञानम् अनुभूतिरूपेण न प्रादुर्भवति तावत्पर्यन्तं तत् परोक्षमेव तिष्ठति । तस्मादेव **दूरस्थं चान्तिके च तत्** इति गीता स्मरणं प्रसिद्धम् । इदमपि अत्र ज्ञेयं यत्, तात्त्विकदृष्ट्याऽपि अपरोक्षं ब्रह्म वेदान्तविचारं विना स्वात्मभूतं चेदपि अपि ज्ञातुं न शक्यते । अतः ब्रह्मज्ञानार्थं वेदान्तविचारः आवश्यकः एव ।

## २४. गङ्गाजलपानेन मुक्तेः खण्डनम्-

गङ्गाजलस्य मुक्तिसाधनत्वेन पुराणेषु समर्थितत्वात् गङ्गाजलपानेनैव मुक्तिः भवति इति पक्षं स्वीकृत्य आक्षेपः क्रियते यत्, **"अम्ब त्वद्दर्शनान्मुक्तिः, न जाने स्नानजं फलम् "**[17] इति पुराणवचनानुसारं परमं पवित्रं गंगाजलं मुक्तिदायकं भवति इति कारणेन मुमुक्षुणा तदेव संसेव्यम् इति पूर्वपक्षः । अत्र अतः शब्देन उत्तरं प्रतिपादयति ग्रन्थकारः।

गङ्गाजलस्य पावित्र्यदर्शनेन तस्य मुक्तिदायकत्वम् उक्तं पूर्वपक्षिणा । अद्वैतवेदान्तदृष्ट्या **आत्मा एक एव पवित्रं वस्तु भवति ।** तस्य आभासवशाद् एव देहादिषुपवित्रत्व लाभः चिन्त्यते । आत्माभासरहितः देहः गङ्गाजलादिना अपि पवित्रीकर्तुं न शक्यते । चिदाभासकारणेन एव केशनखादीनाम् अत्यन्तनिष्कृष्टानामपि पवित्रत्वसिद्धिः भवति । अत एव देहात् छिन्नानां केशनखानाम् अपवित्रत्वदर्शनं

[16] बृह. उप. 3.4.1)
[17] गङ्गाध्यानश्लोक २

सर्वदा अनुभूयते एव । अर्थात् ग्रन्थकारः अत्र बोधयितुम् इच्छति यत् चैतन्यसम्बन्धकारणेनैव देहस्य पावित्र्यादिव्यवहारः भवति । देहे वर्तमानानां केशनखादिनां अचैतन्यकारणेनैव शुद्ध्यशुद्धि विचारः भवति । यदा अस्मात् चैतन्ययुक्तात् देहात् केशनखादीनां कृन्तनं भवति तदा तानि अवकरसदृशानि मत्वा अपवित्राणि इति मन्यन्ते ।

अर्थात् चैतन्यसम्बन्धाद् एव सर्वत्र पवित्रापवित्रादिविचारः दृश्यते । अत एव चैतन्यनिर्गतात् मृतात् देहात् अपवित्रत्वव्यवहारः सर्वदैव क्रियते इति कारणेन पावनत्वधर्मः केवलम् आत्मनः सम्भवति । **आत्मा एकम् एव परमं पवित्रं वस्तु** इति ज्ञेयम् । यथा विष्णुपादोद्भवत्वात्, शिवशिरोधृतत्वात् च गङ्गायाः पवित्रपावनत्वादि व्यवहारः भवति

तथैव चैतन्यस्य सम्बन्धात् देहादीनां पवित्रत्वादिव्यवहारः भवति । तस्मात् गङ्गाजलपानात् मुक्तिः न सम्भवति अपि तु आत्मज्ञानादेव इति सिद्धान्तः ।

## २४. सकृदुपदेशाद् ब्रह्मापरोक्षत्वस्य खण्डनम् -

केचन ब्रह्मविचारसन्दर्भे तस्य अनपेक्षितत्वं लक्ष्यीकृत्य एवमपि आशंकन्ते यत्, यथा **अयं घटः** इति ज्ञानेन सकृदेव अपरोक्षज्ञानं जायते तथा **अयमात्मा ब्रह्म**[18] इति सकृदुपदेशादेव ब्रह्मापरोक्षम् भवतु । तत्र एवम् उत्तरति ग्रन्थकारः ।

सकृदुपदेशेन अपरोक्षज्ञानं भवितुं नार्हति । यतो हि अनादिकालम् आरभ्य वर्तमानपर्यन्तं सर्वस्यापि आत्मनि जीवभ्रमः दृश्यते एव । अर्थात् मनुष्यस्य स्वरूपम् आत्मरूपेण अस्ति चेदपि सः जीवात्मना स्वात्मानं जानाति इत्यतः अनादि कालादेव स्वात्मनि जीवभ्रमाः सर्वेषाम् अस्ति एव । तस्य अनादि कालात् प्राप्तस्य जीवात्मभ्रमस्य निराकरणं सकृदुपदेशात् नैव शक्यते भवितुम् । अतः यावत्कालपर्यन्तं जीवभ्रमनिवृत्तिपूर्वकः ब्रह्मत्वनिश्चयः न जायेत, तावत्कालपर्यन्तं ब्रह्मविचारः कर्तव्यः भवति इत्यतः अनादिकालजनितस्य जीवात्मभ्रमस्य निराकरणार्थ सकृदुपदेशः न लाभकरः । अपि तु जीवभ्रमनिवृत्तिपूर्वकः ब्रह्मात्मनिश्चयः यावत्पर्यन्तं न जायते तावत्कालपर्यन्तं ब्रह्मविचारः कर्तव्यः भवति इति बोद्धव्यम् ।

## २६. ब्रह्म स्वात्मा इति ज्ञानं शास्त्रविचारादेव -

ब्रह्म यदि निर्विशेषचिन्मात्रं तर्हि तत्र कथं शास्त्रप्रामाण्यं स्यात् इति पूर्वपक्षः । ब्रह्मणः स्वरूपसन्दर्भे, शास्त्रस्य प्रामाण्यविषये च पूर्वपक्षिणः शङ्काम् एवं समादधति ग्रन्थकारः ।

---

[18] बृ.उप.४.४.५, गीताप्रेस गोरखपुर

ब्रह्म निर्विशेषचिन्मात्रं भवति इति सत्यमेव । परन्तु तदेव ब्रह्म स्वात्मा इति ज्ञानं शास्त्रविचारादेव उदेतुम् अर्हति । शास्त्रविनियोगकारणेन एव एवं प्रकारिका अखण्डाकारकारा वृत्तिः जायते । अत एव ब्रह्म एव आत्मा इति अखण्डाकारवृत्तिजनने शास्त्रस्य विनियोगः भवति इति कारणेन ब्रह्मणः निर्विशेषचिन्मात्रत्वेऽपि तस्य शास्त्रप्रामाण्यं भवितुम् अर्हति एव ।

एवं प्रकारेण शारीरकचतुःसूत्रीविचारग्रन्थे प्रतिपादितम् आत्मस्वरूपम् अत्र दर्शितम् ।

## शोधपरिणामः -

अस्य शोधपत्रस्य साररूपेण केचन **निष्कर्षाः** अत्र दीयन्ते ।

**१. बेल्लङ्कोण्डरामरायकवेः योगदानम् -**

- अशीतिपृष्ठानां ग्रन्थे शारीरकचतुःसूत्रीविचारग्रन्थे प्रथमपञ्चाशतपृष्टेषु (५०) आत्मचर्चा व्याप्ता वर्तते ।
- अथातो ब्रह्मजिज्ञासा इति सूत्रगतस्य अतःशब्दस्य शताधिकहेतूनां शृङ्खलां प्रदर्श्य तद्द्वारा प्रसङ्गानुसारम् आत्मस्वरूपं चर्चितं वर्तते इति अत्र विशेषः ।
- सूत्रविश्लेषणस्य इदम् अभिनवोदाहरणम् । इतः पूर्वं प्राप्तेषु चतुःसूत्र्याः व्याख्याग्रन्थेषु एतादृशपद्धत्या ब्रह्मसूत्रस्य आद्यानां चतुर्णां सूत्राणां विश्लेषणम् इतः पूर्वं केनापि न कृतम्।
- यथा प्रथमसूत्रगतस्य **अतःशब्दस्य विवरणं** प्रयोजनं च ग्रन्थकारेण दर्शितं तथैव ब्रह्मविचारस्य अनिवार्यता अपि खण्डनमण्डनद्वारा ग्रन्थेस्मिन् प्रतिपादितं वर्तते ।
- अस्मिन् ग्रन्थे यथा प्रथमसूत्रस्य अतः शब्दस्य व्याख्यानसमये श्रीबेल्लङ्कोण्डरामरायकविना यथा `आत्मस्वरूपं` चर्चायाम् अनुस्यूतं न तथा पूर्वं केनापि कृतम् ।
- अद्वैतवेदान्तदृष्ट्या अभिनवशैल्या च सूत्रव्याख्यानावसरे आदिशङ्कराचार्याणां मतस्य कुत्रापि खण्डनं ग्रन्थकारेण न कृतम् ।
- विशिष्टाद्वैतमतस्य अत्र खण्डनं कृतं वर्तते । तत् चतुःसूत्रीसन्दर्भे पूर्वं कस्यापि ग्रन्थे न प्राप्यते ।
- अद्वैतवदान्तस्य ग्रन्थेषु तावत् प्रस्थानत्रय्याः एव प्रामाण्यम् अङ्गीक्रियते । तस्मात् श्रुतिस्मृतीनाम् अर्थात् उपनिषद् भगवद्गीतायाश्च वाक्यानि प्रमाणरूपेण उद्ध्रियन्ते । परन्तु ग्रन्थकारस्तु स्वमतप्रतिपादानावसरे अध्यात्मरामायणादीनां ग्रन्थानामपि वाक्यानि प्रमाणत्वेन ददाति ।

**२. अस्मिन शोधपत्रे निष्कर्षरूपेण प्राप्ताः अद्वैतसिद्धान्ताः खण्डनानि च -**

| | **सिद्धान्तः** | **खण्डनम्** |
|---|---|---|
| १ | आत्मब्रह्मणोः अभेदः | आत्मपरिच्छेदस्य खण्डनम् |

| | | |
|---|---|---|
| २ | द्वैतपदार्थैः अद्वैतस्य आत्मनः परिच्छेदः न शक्यते | जीवनानात्वखण्डनम् |
| ३ | व्यावहारिकपदार्थैः पारमार्थिकस्य परिच्छेदः न शक्यते | आत्मनः अप्रमाणत्वस्य खण्डनम् |
| ४ | आत्मनः एकत्वम् | आत्मनः अणुत्वस्य खण्डनम् |
| ५ | आत्मा विभूः स च सर्वव्यापि । | आत्मनः अणुत्वस्य खण्डनम् |
| ६ | आत्मनः जीवोत्क्रमणं बुद्धितादात्म्याध्यासस्य कारणेन भवति । | तत्त्वमसि वाक्यार्थद्वारा विशिष्टाद्वैतखण्डनम् |
| ७ | वस्तुतस्तु आत्मा पूर्णब्रह्मैव । | आत्मनः मिथ्यात्वस्य च खण्डनम् |
| ८ | पूर्णब्रह्मणः बुद्ध्यवच्छिन्नचैतन्यस्य च न कोऽपि भेदः | गङ्गाजलपानेन मुक्तेः खण्डनम् |
| ९ | आत्मनि विद्यमानं सर्वान्तरत्वम् एव प्रत्यक्त्वम्, तदेव च चैतन्यस्य स्वरूपम् । अत एव तस्य प्रत्यगात्मा इति नामान्तरम् । | सकृदुपदेशाद् ब्रह्मापरोक्षत्वस्य खण्डनम् |
| १० | ईश्वरशब्दस्य परमात्माचैतन्यम् इत्यैव अर्थः । | |
| ११ | अन्तःकरणावच्छिन्नं चैतन्यं प्रत्यगात्मा मायावदवच्छिन्नं चैतन्यं च परमात्मा इति । | |
| १२ | उपाधिभेदे सत्यपि न तात्त्विक भेदो न वा वस्तुभेदः । | |
| १३ | अन्तःकरणनानात्वे अङ्गीकृतेऽपि न आत्मनानात्वम् । | |
| १४ | तत्त्वमस्यादिना शुद्धाद्वैतं प्रतिपाद्यते न तु विशिष्टाद्वैतम्। | |
| १५ | आत्मनि मायाविद्ये अध्यस्ते भवतः । | |
| १६ | अध्यस्तस्य सर्वस्यापि वस्तुनः मिथ्यात्वम् । | |
| १७ | आत्मा स्वयं निरूपः भवति । | |
| १८ | आत्मनः सत्यत्वादयो धर्माः व्यावहारिकाः | |
| १९ | साक्षी-आत्मा-ब्रह्म-परमात्मा चेति सर्वेपि शब्दाः एकार्थनिदर्शकाः भवन्ति | |
| २० | सर्वोपि भेदव्यवहारः माया-अन्तकरणयोः उपाधिप्रयुक्तत्वात् भवति । | |
| २१ | नित्यानित्यवस्तुविवेकार्थं ब्रह्मविचारस्य अपेक्षा नास्ति । | |
| २२ | आत्मा एकम् एव परमं पवित्रं वस्तु । | |

| | | |
|---|---|---|
| २३ | ब्रह्म स्वात्मा इति ज्ञानं शास्त्रविचारादेव | |
| २४ | ब्रह्म एव आत्मा इति अखण्डाकारवृत्तिजनने शास्त्रस्य विनियोगः भवति । | |

**लेखोद्देश्यम् -**

**३.** आधुनिककाले शारीरकचतुःसूत्रीविचारग्रन्थस्य छात्रदृष्ट्या उपादेयतायाः अनिवार्यतायाः च प्रतिपादनम् ।

- भारतस्य बहुषु विश्वविद्यालयेषु स्नातकोत्तरस्तरे `ब्रह्मसूत्रचतुःसूत्री` पाठ्यते । परन्तु छात्राणां पूर्वज्ञानाभावात् शाङ्करभाष्यस्य अवगमनाय काठिन्यम् अनुभूयते । तत्र `शारीरकचतुःसूत्रीविचारस्य` अध्यापनेन सरलभाषया शाङ्करभाष्यस्य सारं ज्ञातुं साहाय्यं भवेत् ।
- अद्वैतवेदान्तेतरशास्त्राणां शिक्षकाणां कृते `चतुःसूत्र्याः सभाष्यं` पठनात् पूर्वं यदि `शारीरकचतुःसूत्रीविचारस्य`पाठः क्रियेत तर्हि अद्वैतवेदान्तस्य प्रमेयानां सिद्धान्तानां च सम्यक् ज्ञानं अध्यापकस्य तन्माध्यमेन च छात्राणामपि सम्भवेत् ।
- अद्वैतवेदान्तस्य अध्ययनाय ये सामाजिकाः वैदेशिका अपि आकृष्टाः भवन्ति, तेषां शास्त्रप्रवेशः श्रीबेल्लङ्कोण्डरामरायकवेः ग्रन्थात् भवितुम् अर्हति ।
- तस्मात् भारतस्य सर्वेष्वपि उच्चशैक्षिकसंस्थासु `शारीरिकचतुःसूत्रीविचारस्य` समावेशः पाठ्यक्रमे भवतु ।
- अस्य ग्रन्थस्य शास्त्रप्रतिपादनसहजताम् अवलोक्य `शारीरिकचतुःसूत्रीविचारम्` आश्रित्य राष्ट्रियान्ताराष्ट्रियकार्यशालानाम् आयोजनेन अद्वैतवेदान्तप्रविविक्षुणां साहाय्यं भवेत् ।

**भविष्यदृष्ट्या शोधशक्यतानां प्रतिपादनम् ।**

- यथा अत्र आत्मनः विषये संगृह्य लिखितं तथा माया, अध्यासः, ब्रह्म, ब्रह्मविचारः, मुक्तिः इत्यादयः बहवः विषयाः विशेषेण अध्येतुं योग्याः सन्ति ।
- अस्य ग्रन्थस्य अतःशब्दविचारः स्वतन्त्रशोधस्य विषयः ।
- पञ्चपादिकादिषु पूर्वचतुःसूत्री व्याख्यानेषु अथवा ब्रह्मसूत्रव्याख्यानेषु च अस्य ग्रन्थस्य तुलना समीक्षणं वा कर्तुं शक्यते ।
- श्रीबेल्लङ्कोण्डरामरायकवेः अद्वैतवेदान्तशास्त्रे योगदानस्य समीक्षणात्मकम् अध्ययनं कर्तुं शक्यते ।

## सन्दर्भग्रथसूची -


१. भोलेबाबा, ब्रह्मसूत्रशाङ्करभाष्यम्, चौखम्बा प्रकाशन, वाराणसी.

२. तृतीय पुनर्मुद्रण, (२००७) ईशादि नौ उपनिषद् शाङ्करभाष्यार्थः, गीताप्रेस, गोरखपुर

३. डॉ. ई. आर. सोलोमन (तृतीय आवृत्ती१९९६) ब्रह्मसूत्रभाष्यम्भामतीकल्पतरूपरिमलसहितम्, परिमलप्रकाशन, दिल्ली.

४. का. ई. देवनाथाचार्य,(प्रथम आवृत्ति २००६) ब्रह्मसूत्रश्रीभाष्य श्रीभगवान रामानुजमुनिविरचित, श्री नृसिंहप्रिया ट्रस्ट, मैलापुर, चेन्नई,

५. यतिवर भोलेबाबा (२०११) ब्रह्मसूत्र -भाषानुवाद सहित शाङ्करभाष्य-रत्नप्रभा, भारतीय विद्या प्रकाशन, वाराणसी

६. Dr. Penna Madhusudan, (2012) Brahmatattwaprakashika Of Sadashivendrasaraswati Sanskrit Academy, Osmania University .